AIJRELPLS VOLUME 10, ISSUE 1 (2025, JAN/FEB) (ISSN-2456-3897)ONLINE
Anveshana's International Journal Of Research In Education, Literature, Psychology And Library Sciences

# अभिज्ञानशाकुन्तले मुख्येतर पुरुषपात्राणां विशिष्टमध्ययनम्

**अमरेन्द्र कुमार मिश्रः**
**सहाचार्य (साहित्यविभागः)**
**कालियाचक विक्रमकिशोर आदर्श संस्कृत महाविद्यालयः**
**पूर्वमेदिनीपुरं, पश्चिमबङ्गः**

संस्कृतकाव्यवाङ्मये कविकुलगुरुकालिदासकृताऽभिज्ञानशाकुन्तलस्य रमणीयता साहित्यिकेषु सहृदयेषु च सर्वदा आह्लादयत्येव। कालिदासेन अभिज्ञानशाकुन्तलस्य चरित्रचित्रणमत्यन्तं साफल्यतया कृतमस्ति। अस्य नाटकस्य न केवलं मुख्यपात्राणां चरित्राणि रमणीयकानि, अपि तु गौणपात्राणां चरित्राणां रमणीयता सुमनोज्ञतया निरमायि कालिदासेन। अस्मिन् नाटके प्रत्यक्षपरोक्षरूपेण अष्टचत्वारिंशत्पात्राणां नियोगः कृतः। प्रत्यक्षपात्रेषु षड्विंशतिपुरुषपात्राणां तथा सप्तदशस्त्रीपात्राणां वर्णनं समुपलभ्यते। अप्रत्यक्षपात्राणां संख्या पञ्च सन्ति। अप्रत्यक्षपात्रेषु स्त्रीपात्रमस्ति मेनका पुरुषपात्राणि च इन्द्रः, जयन्तः, विश्वामित्रः, दुर्वासा। प्रत्यक्षपात्राणां मध्ये दुष्यन्तः, विदुषकः, कण्वः, मारीचः, शार्ङ्गरवः, शारद्वतः इत्यादयः। एवञ्च स्त्रीपात्रेषु शकुन्तला, अनसूया, प्रियंवदा इत्यादयः।
अस्मिन् अध्याये गौणपात्रेषु पुरुषचरित्राणां विशिष्टमध्ययनं विधत्ते।

पुरुषपात्रेषु मुख्यपुरुषपात्रं भवति अस्य नाटकस्य नायकः दुष्यन्तः। अत्र गौणपात्राणां विशिष्टाध्ययनत्वात् प्रधानपात्रस्य विशेषतया आलोचनं नैवात्र विधीयते। वस्तुतः मुख्यपात्रस्य नायकस्य विषये आलोच्यते चेज्ज्ञायेत कथं नाटकनियमाननुसृत्य कालिदासः तस्य नाटकस्य पात्राणां चरित्रचित्रणमकरोत्। अस्मिन्नाटके धीरोदात्तगुणसम्पन्ननायकस्य नियोगोऽकारि कालिदासेन। धीरदात्तनायकस्य लक्षणमवोचि दशरूपके-

**महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।**
**स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः[1]।**

एतेषां सर्वेषां गुणानां समावेशो दुष्यन्ते दृश्यते इति यथार्थं कालिदासस्य नायकचित्रणम्। गौणपात्रेषु अन्यतमो भवति महर्षिकण्वः।

**महर्षिकण्वः-**

कविकालिदासेन अभिज्ञानशाकुन्तले ऋषित्रयाणामुल्लेखः कृतः। यथा कण्वः, दुर्वासा, मारीचश्च। तेषु अन्यतमो भवति महर्षिः कण्वः। कश्यपगोत्रे उत्पन्नत्वात् तस्य अपरं नाम काश्यपः। तस्य सम्पूर्णे अभिज्ञानशाकुन्तले परोक्षरूपेणोपस्थितिः दृश्यते, किञ्च प्रत्यक्षरूपेण चतुर्थाध्याये उपस्थितिः प्राप्यते। तस्य चारित्रिकविशेषतायाः आलोचनमत्र विधीयते।

**नैष्ठिकब्रह्मचारी-**

महर्षिः कण्वः जन्मनः आरभ्य ब्रह्मचर्यव्रतमपालयत्। विवाहं च नाकरोत्। अतः स नैष्ठिकब्रह्मचारी आसीत्। तत्र शकुन्तपक्षिभिः रक्षिता शकुन्तला कण्वेन प्राप्ता पालिता च। अतः शकुन्तलायाः धर्मपिता। अस्य नैष्ठिकब्रह्मचारित्वस्य भानं भवति प्रथमाङ्के दुष्यन्तस्य वचनात्। वचनञ्च- **भगवान् कश्यपः शाश्वते ब्रह्मणि स्थितः इति प्रकाशः।**

**त्रिकालदर्शित्वम्-**

कालिदासेन कण्वस्य त्रिकालदर्शित्वमपि दर्शितम्। अर्थात् भूतभविष्यवर्तमानकालस्य ज्ञातृरूपेण दर्शितम्। स शकुन्तलायाः भविष्यकालिकसंकटज्ञानं पूर्वमेव कृत्वा तस्य शमनाय सोमतीर्थं गत्वा यथाविधि कार्यं विहितम्। उच्यते च प्रथमाङ्के-

**दैवं प्रतिकूलं शमयितुं सोमतीर्थं गतः।**

[1]दशरूपकम्, २——४, ५

मारिचमुखेन तस्य प्रशंसा कृता सप्तमाङ्के यथा-

**तपः प्रभावात् प्रत्यक्षं सर्वमेव तत्रभवतः...**

**तपस्वी-**

महर्षिः कण्वः महान् तपस्वी आसीत्। तस्य तपःप्रभावः अभिज्ञानशाकुन्तले सर्वत्र दृश्यते। न केवलं चेतनेषु अपि तु अचेतनेषु अपि तस्य तपःप्रभावो दरीदृश्यते। शकुन्तलायाः पतिगृहगमनसमये आश्रमस्य वृक्षलतादयोऽपि आभूषणानि प्रददति। एतत्सर्वं कण्वस्यैव तपःप्रभावः। गौतमी यदा आभूषणादिविषये पृच्छति तदा नारदनाम्ना ऋषिकुमारेणावोचि - "**तातकाश्यप्रभावात्**"[2]

**आदर्शपिता-**

यद्यपि महर्षिः कण्वः विवाहं नाकरोत् तथापि अभिज्ञानशाकुन्तले आदर्शपितृरूपेण कण्वः कल्पितः कालिदासेन। स शकुन्तलामत्यन्तस्नेहेन पालितः आसीत्। अतः प्रथमाङ्के उच्यते-

**इमं जीवितसर्वस्वेनापि अतिथिविशेषं कृतार्थं करिष्यति।**[3]

अतः शकुन्तलायाः पतिगृहगमनसमये शोकविह्वलः सञ्जातः-

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पष्टमुत्कण्ठया।**
**कण्ठः स्तम्भित वाष्पवृत्तिः कलुषश्चिन्ताजडं दर्शनम्॥**[4]

शकुन्तलाविषये चिन्ताविरहो भव इत्युक्ते सति कथमेतत्सम्भवमिति वदति-

**शममेष्यति मम शोकः कथं न वत्से त्वया रचितपूर्वम्।**
**उटजद्वारविरुढं निवारबलिं विलोकयतः॥**[5]

आदर्शपितृवत् पुत्रीविषये चिन्ता वर्तते। अत एव प्रतिकूलभाग्यस्य शमनाय सोमतीर्थं गतवान् "**दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः......**"[6]

शकुन्तलां पतिगृहं प्रेषयित्वा औरसपितृवदत्यन्तमानन्दमनुभवति यथा च चतुर्थाङ्के-

**अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।**
**जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥**[7]

**लोकव्यवहारज्ञः-**

यद्यपि कण्वः नैष्ठिकब्रह्मचारी आसीत् आश्रमे एव तस्य वासः। तथापि लौकिकव्यवहारस्य अपूर्वज्ञाता आसीत्। स स्वयं वदति

"**वनौकसोऽपि सन्तो लौकिकज्ञा वयम्।**"[8]

लौकिकव्यवहारस्य यथोचितं ज्ञानादेव गान्धर्वविवाहसूचनानन्तरमेव पतिगृहं प्रेषयितुमादेशं ददाति कण्वः। एवमविवाहितकन्यायाः बहिर्गमनमुचितं नास्तीति हेतोः अनसूयाप्रियंवदे शकुन्तलया साकं न प्रेषयति कण्वः। वदति च-

"**वत्से, इमे अपि प्रदेये। न युक्तमनयोस्तत्र गन्तुम्**"[9]

किञ्च कन्या परकीया वर्तते इत्यस्मिन् विषये वदति-

**अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।**[10]

---

[2]अभिज्ञानशाकुन्तलम्, अङ्कः ४
[3]अभिज्ञानशाकुन्तलम्, अङ्कः १
[4]अभिज्ञानशाकुन्तलम्, अङ्कः ४——११
[5]अभिज्ञानशाकुन्तलम्, अङ्कः ४——२१
[6]अभिज्ञानशाकुन्तलम्, अङ्कः १
[7]अभिज्ञानशाकुन्तलम्, अङ्कः४——२२
[8]अभिज्ञानशाकुन्तलम्, अङ्कः ४
[9]अभिज्ञानशाकुन्तलम्, अङ्कः ४
[10]अभिज्ञानशाकुन्तलम्, अङ्कः४——२२

एवंप्रकारेण महाकविना कालिदासेन अभिज्ञानशाकुन्तले नाटके भारतीयसंस्कृतेः आदर्शरूपेण कण्वस्य चरित्रं चित्रितं वर्तते।

**विदूषकः-**

संस्कृतनाटके विदूषकः एकः परम्परागतपात्रं वर्तते। अस्य प्रयोगः प्रायः दर्शकानां मनोरञ्जनाय हासाय एव भवति। अयं प्रायः ब्राह्मणः नायकस्य मित्रं भवति। नाट्यशास्त्रे विदुषकस्य लक्षणमित्थमवोचि-

**कुसुमवसन्ताद्यिभधः कर्मवपुर्वेशभाषाद्यैः।**
**हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः॥**

अस्मिन् नाटके विदूषकस्य नाम वर्तते माढव्यः अथवा माधव्यः। क्वचित् नायकस्य प्रणयविषये सहायतां करोति विदूषकः। क्वचित् न करोति। यथा द्वितीयाङ्के दुष्यन्तस्य प्रणयविषये सहयताकरणाय दुष्यन्तः साशयं प्रकटयति-

**"विश्रान्तेन भवता ममाप्यनायासे कर्मणि सहायेन भवितव्यम्"**

किन्तु हस्तिनापुरगमनकारणात् प्रणयविषये सहायतां न करोत्यत्र विदूषकः।

पञ्चमाङ्के पुनः हंसपदिकां बोधयितुं स्वयं राजा विदूषकं प्रेषयति। वस्तुतः अस्मिन् नाटके विदूषकस्य प्रयोजनमेव नास्ति। विदूषकं विनैव नाटकस्योद्देश्यपूर्तिर्भवति। तथापि परम्परायाः निर्वाहाय कालिदासेन स्थापितः।

षष्ठे अङ्के विदूषकस्य क्रियाकलापः मनोरञ्जनाय भवति। यत्र विदूषको वक्ति-

**अनेन दण्डकाष्ठेन कन्दर्पव्याधिं नाशयिष्यामि।**[11]

अस्मिन् नाटके विदूषकस्य स्वभावत्रयमधिक्येन दृश्यते। चञ्चलस्वभावसः, सर्वदा भोजनविषवार्तालापं करोति अतः भोजनशीलः, सरलस्वभावः। अत एव राज्ञः सर्वं विश्वसिति यदा राजा वदति **"परिहासविजल्पितं सखे, परमार्थेन न गृह्यतां वचः"** इत्येतस्यापि विश्वासं करोति। तस्य अपर एकः स्वभावः यत् राज्ञः परमसहायकः अथवा विश्वासपात्रमासीत्। अत एव विदूषके मित्रवद्व्यहारो दरीदृश्यते राज्ञः।

**शार्ङ्गरवशारद्वतौ-**

महर्षेः कण्वस्य अन्यतमौ प्रमुखौ शिष्यौ वर्तेते शार्ङ्गरवशारद्वतौ। आचारेण व्यवहारेण परिणतवयस्कौ प्रतीयेते। सम्भवतः कण्वाश्रमे अध्यापनकार्यमपि कुरुतः। यतो हि स्वयं कण्वः तौ मिश्रपदेन आह्वयति-

**"आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तला नयनाय"**[12]

राजापि एतेषु गुरुवदाचरति- **"गुरुशिष्ये गरुसमे"**[13]

द्वितीये चतुर्थे पञ्चमे अङ्के आपातकालिकरूपेण एतयोरुपस्थितिः परिलक्ष्यते। स्वल्परूपेण एतेषामालापः वर्तते चेदपि तयोः चरित्रस्य चित्रणमतीव सुचारुतया क्रियते कालिदासेन। एतयोः साम्यवैष्यम्यमाध्यमेनाध्ययनमत्र प्रदर्श्यते।

**साम्यता-**

द्वावपि कण्वशिष्यौ नैष्ठिकब्रह्मचारिणौ च।

आश्रमवासित्वात् संसाराद्विरक्तौ स्तः। अत एव राजभवने प्रविश्य शार्ङ्गरवः अग्निबद्धगृहवन्मन्यते राजभवनम्। शारद्वतः राजभवनिकाः भोगलिप्तत्वात् अस्पृश्याः उपक्षणीयाः इति मन्यते-

**अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम्।**
**बद्धमिव स्वैरगतिरजनमिह सुख सङ्गिनमवैमि॥**[14]

[11] अभिज्ञानशाकुन्तलम् अङ्कः ६
[12] अभिज्ञानशाकुन्तलम् अङ्कः ४
[13] अभिज्ञानशाकुन्तलम् अङ्कः ६
[14] अभिज्ञानशाकुन्तलम् ५——११

द्वापि परिणतवयस्कौ विद्यानिष्णातौ वर्तेते। द्वयोः परस्परं मैत्रीभावः प्रतीयते। द्वयोः शार्ङ्गरवः ज्येष्ठः, शारद्वतः कनिष्ठः प्रतीयते। द्वापि कर्तव्यपरायणौ वर्तेते। अत एव राज्ञः आह्वानं कृत्वापि समिधाहरणाय वनं गच्छतः- **"राजन्, समिधाहरणाय प्रस्थिता वयम्"**[15]

**वैषम्यता-**

द्वयोः मध्ये कण्वदृष्ट्या शारद्वतापेक्षया शार्ङ्गरवः उत्तमो वर्तते। अत एव चतुर्थाङ्के शार्ङ्गरवस्य नाम गृहीत्वा वदति-

**"आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तला नयनाय"।**

शारद्वतापेक्षया शार्ङ्गरवः वाक्चातुर्ये तथा व्यवहारदृष्ट्या उत्तमः आसीत्। अत एव कण्वः शार्ङ्गरवमाध्यमेन दुष्यन्ताय सन्देशं प्रेषितवान्। शार्ङ्गरवस्य योग्यतायां कण्वः अधिकं विश्वसिति।

शारद्वतः शान्तस्वभावः, किन्तु शार्ङ्गरवः क्रोधीस्वभावो वर्तते। यदा शकुन्तलां राजा न स्मरति तदा शठः, धर्मभीरुः इत्यादिशब्दानां प्रयोगं कृतवान् शार्ङ्गरवः। किन्तु अत्यन्तशान्तस्वभावः शारद्वतः केवलं वदति- **शार्ङ्गरव, विरम त्वमिदानीम्।** राज्ञे विश्वासार्थं शकुन्तलां वदति "दीयतामस्मै प्रत्ययप्रतिवचनम्" इति। अन्तिमे वदति-

**तदेषा भवतः कान्ता त्यज वैनां गृहाण वा।**
**उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी॥**

शार्ङ्गरवः न केवलं राजानं क्रोधेन उक्तवान्, अपि तु शकुन्तलां प्रत्युक्तवान् "**इत्थमात्मकृतमप्रतिहतं चापलं दहति**" इति एवं तिरस्कृत्य सर्वेषामागमनसमये पुरस्तात् शकुन्तला आगच्छति चेद्वदति **किं पुरोभागे, स्वातन्त्र्यवलम्बसे।** एवं शार्ङ्गरवस्य क्रोधीस्वभावस्य परिचयः प्राप्यते।

शार्ङ्गरवः तपोवनजीवनमेव सर्वोत्तमं स्वीकरोति नगरवासिनं प्रति उपेक्षाभावस्तस्य वर्तते। अत एव राजभवने प्रविश्य वदति- अहो यद्यपि न परित्यक्ता स्थितिः मर्यादा येन तादृशः अयं नृपः अतिशयेन महाभागः वर्तते। ब्राह्मणादिवर्णानां अधमः शुद्रादि अपि कुमार्गं न सेवते अस्मिन् शासितरि, तथापि सर्वदा अभ्यस्तमेकान्तस्थानं यस्य तादृशेन मनसा अहं लोकैः परिव्याप्तं राजसदनमेतत् सर्वतः अग्निना वेष्टितं गृहमिव तर्कयामि-

**महाभागः कामं नरपतिरभिन्नस्थितिरसौ**
**न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते।**
**तथापीदं शश्वत्परिचितविविक्तेन मनसा**
**जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव**[16]**॥**

किन्तु शारद्वतस्य दार्शनिकविचारो वर्तते। तस्य अपरस्य विषये सहिष्णुता वर्तते। अत एव वदति- अस्मिन् राजभवने सांसारिकभोगेषु सङ्गः आसक्तिः यस्य तादृशं जनम्, अहं, कृतस्नानः तैलमर्दनविहितमिव, पवित्रः अपवित्रमिव, जागरितः शयितमिव, स्वच्छन्दा गतिः यस्य तादृशः जनः निगडितमिव, यथा पश्यति तथैव पश्यामि।

**अभ्यक्तमपि स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम्।**
**बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि**[17]**॥**

शारद्वतापेक्षया शार्ङ्गरवः स्पष्टवादी साहसिकश्च आसीत्। अत एव शकुन्तलायाः पतिगृहगमनकाले शकुन्तलां वदति- "**युगान्तरमारूढः सविता त्वरतामत्रभवती**"। अपि च कण्वमपि वदति "**भगवन्, ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र सन्दिश्य प्रतिगन्तुमर्हति**।[18]

---

[15]अभिज्ञानसाकुन्तलम् अङ्कः १
[16]अभिज्ञानशाकुन्तलम् ५——१०
[17]अभिज्ञानशाकुन्तलम् ५——११
[18]अभिज्ञानशाकुन्तलम् अङ्कः ४

एतदपि वक्तुं शक्यते शार्ङ्गरवस्य व्यवहारे चातुर्यता नास्ति। अपि तु सर्वत्र कलहं वर्धयति। तदपेक्षया शारद्वतः चतुरो वर्तते। विवादस्य शमनं करोति। एवंरूपेण द्रष्टुं शक्यते शारद्वतः एवं शार्ङ्गरवः उभावपि भिन्नस्वभावौ वर्तेते। स्वल्पसमये एव तेषां चरित्रं स्फुटं वर्तते।

**मारीचः-**

अभिज्ञानशाकुन्तले सप्तमाङ्के अत्यन्तस्वल्पसमयस्य चरित्रं वर्तते मारीचः। किन्तु स्वल्पसमये एव सहृदयस्य हृदये स्थानं प्राप्नोत्येव। मारीचः दिव्यलोकस्य निवासी। स्वर्गे सर्वसाधनसौलभ्येऽपि सर्वमनासक्तः सन् तपस्यायामेव लीनो वर्तते। वायुमत्ति। त्रिकालदर्शी अपि आसीत्। अत एव शकुन्तलां दृष्ट्वा दुर्वाससः शापं ज्ञातवान्। तस्य तपःप्रभावात् कृपावशात् भविष्यति प्रापनयोग्यं फलमपि साम्प्रतं प्राप्तुं शक्यते अस्य वर्णनमित्थमकारि दुष्यन्तेन-

**उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राकं तदनन्तरं पयः।**
**निमित्तनैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्तु सम्पदः॥**[19]

एतस्मादेव कारणात् तस्य दर्शनात्प्रागेव दुष्यन्तः तस्य पुत्रं सर्वदमनं पत्नीं शकुन्तलां च प्राप्तवान्। अयं ऋषिः प्रभावातिरेकः आसीत्।

अस्य मारीचस्य स्वभावः पितृतुल्यः वात्सल्यपूर्णः आसीत्। अत एव स्नेहभावेन वार्तालापेन वोधयति "**वस्ते, चरितार्थासि। तदिदानीं सहधर्मचारिणं प्रति न त्वया मन्युः कार्यः।**"

मारीचः सर्वदमनस्य जातकर्मादिकृत्यमकरोत् आशिषञ्चादात् सर्वदमनः अग्रे गत्वा चक्रवर्ती सम्राट् भवेत्। तस्य तपःप्रभावादेव सर्वदमनः अग्रे चक्रवर्ती सम्राट् अभवत्।

स लोकव्यवहारज्ञोऽपि आसीत्। अत एव कण्वः तपःप्रभावादेव सर्वं ज्ञास्यतीति ज्ञात्वा एव दुषन्तशकुन्तलयोः मिलनवृत्तान्तश्रावणाय गालवं प्रेषितवान्। एवं स्वल्पसमये सप्तमाङ्के वर्णितमारीचचरित्रं सर्वेषां सहृदयानां हृदयमाकर्षति।

**सर्वदमनः-**

अभिज्ञानशाकुन्तले वर्णितं यत् मारीचस्याश्रमे हेमकूटपर्वते शकुन्तलायाः गर्भे तस्याः मातुः मेनकायाः पार्श्वे सर्वदमनस्य जन्माभवत्। मारीचः एव तस्य जातकर्मादिकृत्यमकरोत्।

बाल्यादेव एषः तेजस्स्वभावः चञ्चलस्वभावश्च आसीत्। यदा राजा दुष्यन्तः इन्द्रशत्रुं दुर्जयं निहत्य प्रत्यागच्छति स्म समये हेमकूटपर्वतस्य माधुर्यं दृष्ट्वा तथा मारीचो वन्दनीयः इति विचिन्त्य मारीचाश्रममागतवान्। किञ्च वृक्षस्य तले यदा विश्रामं कुर्वन्नासीत् तस्मिन् समये तापसीभ्यां निषिध्यमानः कश्चन बालकः सिंहशावकैः सह क्रीडन्नासीत्। तस्मिन् बालके राज्ञः पितृवत्स्नेहः आसीत्। स च बालकः सिंहशावकं वदति- **जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये** इति वीरोचितैः कृत्यैः तस्य तेजस्स्वभावः प्रतीयते। राजा कस्य कृतिनो बीजमयं बाल इति चिन्तयन् सिंहशावकादन्यत् क्रीडनकं ग्रहीतुं प्रसारितकरस्य तस्य बालकस्य हस्ते चक्रवर्तिलक्षणं दृष्ट्वा हृष्टः सञ्जातः। ततः वाग्व्यापारेणायं विरमयितुमशक्य इति मत्वा एका तापसी तं प्रलोभयितुं मृत्तिकामयूरमानेतुं स्वकुटिरं जगाम। ततः द्वितीया काचन तापसी इतस्ततोऽवलोक्य राजानमकथयत्। भद्रमुख, मोचयानेन दुर्मोकहस्तेन बध्यमानं बालमृगेन्द्रम्। एवं कथोपकथनेन सर्वदमनस्य परिचयं प्राप्तवान् यत् दुष्यन्तशकुन्तलयोरेव पुत्रः सर्वदमनः इति।

एवंरूपेण सप्तमाङ्के अन्तिमभागे आगतस्य सर्वदमनस्य चरित्रं तेजस्स्वरूपेण तथा यथोचितक्षत्रियबीजत्वेन कल्पितमस्ति कालिदासेन।

**दुर्वासा-**

ऋषिदुर्वासाविषये पुराणेषु महाभारतादिषु ग्रन्थेषु दरीदृश्यतेऽत्यन्तक्रोधीस्वभावात्मकः। अभिज्ञानशाकुन्तले यद्यपि विशेषरूपेण दुर्वाससः वर्णनं नास्ति तथा नाटकस्य माधुर्यवृद्ध्यर्थं प्राप्याशायाः विघ्नरूपेण दर्शितं कालिदासेन। अत्रापि चतुर्थाङ्के तस्य क्रोधस्वभावस्य परिचयः दृश्यते। अत्र सामान्याशेंनेव ज्ञायते तस्य तपोनिष्ठत्वं महाप्रभावशालित्वञ्च। स स्वयमेव वदति चतुर्थाङ्के यत्

[19]अभिज्ञानशाकुन्तलम्- ७——३०

**मे वचनमन्यथाभवितुं नार्हति किन्त्वभिज्ञानाभरणदर्शनेन शापो निवर्त्तिष्यते इति...**[20]

तस्य प्रकृतिवक्रत्वमपि दृश्यते। किञ्च स सुलभकोपोऽप्यस्ति। सामान्यकारणेनैव तस्य क्रोधः आगच्छति। अत एव सामान्यकारणेन एव शकुन्तलां शापं ददाति- आः अतिथिपरिभाविनि,

**विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि नमामुपस्थितम्।**
**स्मरिष्यति त्वां न स बोधितोऽपि सन्कथां प्रमत्तः प्रथमं कृतामिव**[21]**॥**

एवंरूपेण दुर्वाससः सुलभकोपत्वं प्रकृतिवक्रत्वमित्यादिचरित्रस्य चित्रिणमभिज्ञानशाकुन्तले अप्रत्यक्षरूपेण कृतं कालिदासेन।

**सोमरातः-**

दुष्यन्तस्य प्रधानपुरोहितरूपेण सोमरातस्य दर्शनम् अकारि अभिज्ञानशाकुन्तले कालिदासेन। वस्तुतः विशेषरूपेण अत्र तस्य वर्णनं नास्ति तथा किञ्चिदेव कालेन सहृदायानां हृदयमाह्लादयति सोमरातः। पञ्चमाङ्के यदा कण्वाश्रमात् शकुन्तलाशार्ङ्गरवादयः आगतवन्तः तदा तेषामातिथ्यसत्कारार्थं नियोगः कृतो राज्ञा। तस्य योग्यपुरोहितत्वेन कल्पनमत्र कृतम्। अत एव तस्य सोमरातस्य मुखेनैव कलिदासः कथयति-

**एते विधिवदर्चितास्तपस्विनः**[22]

तस्यान्येषां प्रति सहानुभूतिः अत्र दरीदृश्यते। अत एव सर्वे शकुन्तलां परित्यज्य गच्छति चेदपि वदति

**अत्रभवती तावदाप्रसवादस्मद्गृहे तिष्ठतु**[23]।

एवंरूपेण अभिज्ञानशाकुन्तले अस्य कोमलस्वभावस्य राजानुगतस्य सहानुभूतिशीलस्य परिचयः प्राप्यते।

**भद्रसेनः-**

अभिज्ञानशाकुन्तले राज्ञः दुष्यन्तस्य सेनापतिर्वर्तते भद्रसेनः। अस्मिन् नाटके भद्रसेनः राज्ञः आज्ञापालकः सेनापतिः अस्ति। अत्र राजानं प्रति तस्य कर्तव्यनिष्टत्वं वर्तते यथोचितं वर्तते। अत एव यदा मृगानुसारी राजा सैनिकेभ्यः दूरं कण्वाश्रमं प्रविष्टवान्। तदा तस्यान्वेषणाय तत्र यथासमयमुपष्ठति। एवं स मन्दोत्सुक्योऽपि राज्ञः मनोविनोदार्थं वदति-

**मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः**
**सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।**
**उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले**
**मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः**[24]**॥**

एवमभिज्ञानशाकुन्तले यथायोग्यभृत्यरूपेण योग्यसेनापतिरूपेण भद्रसेनस्य चरित्रचित्रणमकारि कालिदासेन।

**कञ्चुकी-**

अभिज्ञानशाकुन्तले कञ्चुक्याः विशेषभूमिका नास्ति। कञ्चुकी साधारणतः ब्राह्मणवृद्धः सर्वगुणसम्पन्नः कार्यकुशलश्च भवति। भरतमुनिः स्वनाट्यशास्त्रे कुञ्चक्याः लक्षणमाह-

**अन्तःपुरचरो वृद्धौ विप्रो गुणगणान्तवितः।**
**सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते॥**

अस्मिन्नाटके केवलं पञ्चमाङ्के एव कञ्चुक्याः नियोगः दृश्यते। यदा कण्वाश्रमात् सन्देशं शकुन्तलां च स्वीकृत्य शिष्याः आगच्छन्ति तेषां सन्देशं राजानं प्रति प्रापयति कञ्चुकी। वदति च-

---

[20]अभिज्ञानशाकुन्तलम् अङ्कः ४
[21]अभिज्ञानशाकुन्तलम् ४—१
[22]अभिज्ञानशाकुन्तलम् अङ्कः ५
[23]अभिज्ञानशाकुन्तलम् अङ्कः ५
[24]अभिज्ञानशाकुन्तलम् अङ्कः २——५

**जयतु देवः। एते खलु हिमगिरेरुपत्यकारण्यवासिनः कण्वस्य संदेशमादाय सस्त्रीकास्तपस्विनः संप्राप्ता श्रुत्वा देवः प्रमाणम्।**

वस्तुतः अत्रापि भरतमुन्युक्तसर्वलक्षणसम्पन्नस्य कुञ्चक्याः नियोगः कृतः कालिदासेन।

एतेषां गौणपात्रेषु प्रधानचरित्राणां वर्णनं कालिदासेन स्वस्याभिज्ञानशाकुन्तले सुचारुतया कृतमस्ति। एतान्विहाय स्वकार्यसिद्ध्यर्थं नाटकपरम्परानिर्वाहार्थमनेकेषां पात्राणां नाममात्रेण अथवा सामान्यरूपेण नियोगः कालिदासः कृतः। यथा- सूत्रधारः, सूतः, वैखानसः, ऋषिकुमारौ, वैतालिकः, दौवारिकः(रैवतकः), कण्वशिष्यः हारितः, करभकः, धीवरः, सूचकः, जानुकः, मातलिः, गालवः इत्यादीनां चरित्राणां नियोगः कालिदासेन स्वस्याभिज्ञानशाकुन्तले कृतः।

१. त्रिपाठी कृष्णमणि। **अभिज्ञानशाकुन्तलम्।** वाराणसी; चौखम्बा सुरभारती प्रकाशन। वाराणसी- २२१००१

२. द्विवेदी कपिलदेव। **अभिज्ञानशाकुन्तलम्।** प्रकाशक रामनाराणलाल विजयकुमार। इलाहावाद; विश्वभारती अनुसन्धान परिषद्, २०१२। इलाहाबाद- २११००२।

३. शास्त्री राकेश। **अभिज्ञानशाकुन्तलम्**। दिल्ली; संस्कृतग्रन्थागार। दिल्ली- ११००८५।

४. वसु, अनिलचन्द्र, सम्पा. अभिज्ञानशकुन्तलम्. चतुर्थ.सं. कलकाता : संस्कृत बुक डिपो, २००६.